# पाठ-१८
# पर्यावरणस्य संरक्षणम्

**सारान्शः**
यत् अस्मान् परितः आवृणोति तत् पर्यावरणम् अद्यत्वे पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र तीव्रा दृश्यते । वेदेषु पर्यावरणविषये सर्वत्र कल्याणकामना दृश्यते । मानवजीवनाय स्वच्छं शुद्धं च पर्यावरणम् अपेक्ष्यते। इतस्ततः निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। पर्यावरणस्थानं पञ्चविधम् । प्रथमं स्थानं तु स्थलमण्डलम् भूमिमण्डलम् वा। पादपाः मनुष्यस्य क्षेमाय भवन्तु । भागवतपुराणेऽपि आदिष्टम् यत् अस्माभिः वृक्षाः कदापि न दहनीयाः ।महाभारते सत्यं लिखितम् "व्याघ्रेण वनं रक्ष्यते।" अशोकस्य राज्ये वृक्षकर्तनं पशुपक्षिवधः च दण्डनीय अपराधः आसीत्। जलं पर्यावरणस्य द्वितीयं तत्त्वं वर्तते। दूषितजलपानेन स्वास्थ्यं नश्यति । अन्तरिक्षमण्डले तेजोमण्डलं पर्यावरणस्य एकं तत्वम् अस्ति। पर्यावरणस्य प्रकृष्टं तत्वं वायुमण्डलम् । वायुः दूषितः न करणीयः यतः विषाक्तो वायुः अनेकान् रोगान् जनयति।नभोमण्डलम् पर्यावरणस्य पञ्चमं स्थानम्। वाहनानि, यन्त्रशालाः, ध्वनिविस्तारकाः च उच्चैः ध्वनिम् उत्पाद्य ध्वनिप्रदूषणं कुर्वन्ति येन बधिरत्वम् उत्पाद्यते। ओजोनपटले विकिरणप्रभावेण अधुना अपक्षयः दृश्यते। यदि अस्य रक्षा न क्रियते तदा भयंकराः व्याधयः सम्भविष्यन्ति । यदि वयं पर्यावरणरक्षणे सावधानाः भवेम, तदा जीवनं शान्तिमयं भवेत्। अतः ऋषयः प्रजाभ्यः पशुभ्यः च अभयं कल्याणं च कामयन्ते ।

**मुख्य बिन्दवः**
वेदेषु प्रकृतिः-
**स्थलम्-** पृथिवी अस्माकं माता अतः नमस्करणीया वर्तते कथितं हि माता भूमिः पुत्रोऽहं पृथिव्याः । अथर्ववेद 12/1/12
**जलम्-** (आपः) शंनो देवीरभिष्टये आपो भवन्तु पीतये। यजु. 36/12
**तेजः-** अग्निमीडे पुरोहितं, यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्। ऋग्वेद 1/1/1/
**वायुः-** ओउम् शन्नो वातः पवतां शन्नस्तपतु सूर्यः । यजु. 36/10
**नभः-** शं न सुरुचिः भवतु स्वधाभिः । शं रोदसी बृहती शं नो अद्रिः । शं नो देवानां सुहतानि सन्तु । नाहक् 7/35/3

**अवगच्छामः**
यजुर्वेदे सर्वत्र शान्तिः भवेत्। क्वचिदपि विचारप्रदूषणं न स्यात् इत्थं प्रार्थितम् - ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव सा मा शान्तिरेधि । पर्यावरणसंरक्षणाय एतादृशी शान्तिः सर्वत्र अपेक्षिता।

**आवश्यकोऽयं ज्ञानम्**
भारतदेशे 2200 वर्षेभ्यः पूर्वम् एव पर्यावरणस्य जागरूकता आसीत् इति नूनं विस्मयावहम्। यस्य पर्यावरणस्य विषये अद्य वयं बहु चिन्तिताः स्मः तस्य पर्यावरणस्य संरक्षणस्य चिन्ता अशोकस्य राज्येऽपि आसीत् । अस्य प्रमाणाः सन्ति तत्कालीनाः उपलब्धाः शिलालेखाः । ततः तु पर्यावरणस्य ईदृशी समस्या नासीत् यतः अस्माकं पर्यावरणं प्रकृतेः विविधोपादानैः पूर्णमासीत्। समस्तानि प्राकृतिकतत्त्वानि देवताः एव मन्यन्ते स्म। अतः यजुर्वेदे उक्तम् - अग्निर्देवता वातोदेवता सूर्यदेवता.... वरूणो देवता ।।
ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाया दिव्यो गन्धर्वः केतपूः केतं न पुनातु वाचस्पतिर्वीचं नः स्वदतु । यजु. 30/11

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**सूत्रम्- वृद्धिरेचि**
**अर्थः-** अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्ध्येकादेशः भवति।

**सूत्र- एङः पदान्तादति**
**अर्थः -** पदान्तात् एङः अति परे पूर्वरूपम् एकादेशः स्यात्।

**सूत्रम् -** अकः सवर्णे दीर्घः
**अर्थः-** अकः सवर्णाचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशः भवति।
**शब्दार्थाः**
1. आवृणोति = घेरता है
2. आद्रियते = आदर किया जाता है।
3. वीरुधः = लहलहाती लताएँ
4. द्रुमेभ्यः = पेड़ों के लिए
5. दूषितजलपानेन= गंदा पानी पीने से
6. यन्त्रशाला: = कारखाने
7. अपक्षयः = विनाश, हानि
8. कामयन्ते = कामना करते हैं

**योग्यतां वर्धयत**

अद्यत्वे पर्यावरणस्य भीषणा समस्या वर्तते । वयं गृहस्य अवकरं नदीषु क्षिपामः; वस्त्राणि च फेनिलेन नदीषु, कूपेषु सरोवरेषु एव प्रक्षालयामः। औद्योगिकगैसैः अपि जलं प्रदुष्यते। किमधिकम् गंगायमुनेऽपि प्रदूषिते जाते। वयं तत् दूषितं जलमेव पिबामः रुग्णाः च भवामः । ध्वनिविस्तारकयन्त्रैः विशेषतः रात्रौ विभिन्नसमारोहेषु उच्चैः गीतानां कोलाहलेन ध्वनिप्रदूषणं जायते। औद्योगिकविकासेन वायुप्रदूषणमपि जातम् । एवमेव विचारप्रदूषणम् अपि सर्वत्र दृश्यते । अतोऽस्माभिः सदा पर्यावरणस्य संरक्षणं कर्तव्यम् ।

**पाठ संप्रेष्यः**

- पर्यावरणस्य समस्या चिन्तनीया अस्ति ।
- पर्यावरणस्थानस्य पञ्चविधानि नामानि ।
- अस्माभिः वृक्षदहनं न कर्तव्यम्, प्लास्टिकवस्तूनां प्रयोगः न कर्तव्यः यतः तानि प्रदूषणं जनयन्ति ।
- वाहनानि, ध्वनिविस्तारकयन्त्राणि ध्वनिप्रदूषणं कुर्वन्ति ।पशूनां पक्षिणां च संरक्षणम् आवश्यकम्, वृक्षकर्तनं न कर्तव्यम्, दूषितं जलं न पातव्यम्।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।